ॐ

# श्रुति सूक्ति माला

यस्मै नमो भवति यस्य गुणाः समग्राः
नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमधिक्रतौ यः
तं त्वामनन्यगतिरीश्वर संश्रयामि ॥ १ ॥

वेदेषु वा तदनुयायिषु वा विचार्य
तन्त्रेषु वाक्यमखिलं प्रतिपादकन्ते ।
तात्पर्यसङ्ग्रहमहं विदधे महेश !
मह्यं प्रसीद नय मामृजुना पथा त्वम् ॥ २ ॥

मन्त्रार्थवादविधिभिर्बहुधा विभक्तो
यश्शब्दराशिरनपेक्षतया प्रमाणम् ।
सोयं विमत्सरविमृष्टपदार्थतत्वो
वेदः प्रकाशयति केवलमीश्वरं त्वाम् ॥ ३ ॥

शब्दोयमीश्वर इति श्रुतिगोचरस्सन्
आनीलकण्ठमवतंसितचन्द्रलेखम् ।
त्वामेव बोधयति नाथ ! निजार्थपोषात्
अन्यं पुनः प्रकरणादि निपीडनेन ॥ ४ ॥

शब्दस्तवायमभिधानमनन्यशब्दो
नैघण्टुकाश्शिवपदादिवदेनमाहुः ।
वस्तु स्वभावकृतमेव तु पूज्यभावं
ब्रूते महेश्वर ! महान्परमश्च शब्दः ॥ ५ ॥

यस्योपसर्जनमसौ परमो महान्वा
शब्दस्तदर्थमभिधातुमलं प्रकृष्टम् ।
शब्देन पूज्यवचनेन समस्यमानः
पूजां ब्रवीति यदि शब्दविदः प्रमाणम् ॥ ६ ॥

नानीश्वरं भवितुमर्हति विश्वमेतत्
बह्वीश्वरञ्च नितरामयथाप्रमाणम् ।
तल्लोकवेदविदितेश्वरवर्जनेन
कोऽयं भ्रमः कतिचिदीश्वरमन्यमाहुः ॥ ७ ॥

विश्वं निरीश्वरमिदं जगदाह साङ्ख्यो
योगश्च सेश्वरमुभावनुवादिनोऽन्ये ।
नत्वेव संभवति सेश्वरतां ब्रुवाणः
पद्मासनादिभिरनीश्वरशब्दवाच्यैः ॥ ८ ॥

ऐश्वर्यमग्र्यमनुपाधिनिबन्धनन्ते
यद्भूतनाथ ! नमसामपि पात्रमेकम् ।
तत्प्रायशश्श्रुतिषु दुर्लभमेव वाक्यं
मुक्त्वा नमो भवति यत्र भवत्प्रसङ्गम् ॥ ९ ॥

देव ! त्वदेकविषयाणि नमांसि पुंसां
यस्मै नमश्श्रुतिबलादवधारयामः ।
देवान्तरेषु विहितान्यपि तान्यमूनि
स्रोतांसि सागर इव त्वयि संपतन्ति ॥ १० ॥

यस्मै नमश्श्रुतिरनूद्य नमस्विनन्त्वां
एका नियोजनमुवाच पशोः कपर्दिन् !
अन्या च दिव्यशिशुमाराशिरो भवन्तं
शक्यन्तदित्थमुभयेन नमो विधातुम् ॥ ११ ॥

श्रुत्योर्द्वयोरपि नमस्विनमुच्यमानं
त्वामेव तन्तमनुसन्दधतः प्रदेशम् ।
शंसन्ति मन्दमतयोऽपि किमापतन्तं
मध्यन्दिने हि सवितारमपन्हुवीरन् ॥ १२ ॥

कर्मैव शूलधर! शूलगवन्त्वदीयं
मन्त्रा भवन्तमखिलाः प्रतिपादयन्ति ।
त्वामन्तरेण नमसा कृतलक्षणाय
कस्मै पशुं नियुनजानि नियोजय त्वम् ॥ १३ ॥

अङ्गान्तरेषु विबुधान्तरसंस्तुतेषु
यश्शिंशुमारशिरसः परिशिष्यसे त्वम् ।
तस्मै नमो भवितुमीश्वर! सांप्रतन्ते
देवान्तराय न कथञ्चिदनीश्वराय ॥ १४ ॥

या वज्रिणी भवति शङ्कर शङ्खिनी या
मुद्रा च या कमलिनी भरतोपदिष्टा ।
ताभिर्भवन्त्यभिनया विबुधान्तराणां
मौळिस्पृशा करपुटाञ्जलिमुद्रया ते ॥ १५ ॥

दत्तन्नमः किमपिशुश्रुम देवताभ्यः
त्वामन्तरेण नमसामवसानभूमिम् ।
तास्तद्ग्रहीतुमनलन्न हि कश्चिदीष्टे
चोरोपनीतमिव धारयितुं किरीटम् ॥ १६ ॥

तस्मै नमो भवतु यत्र निषीदसीति
सर्वं नमस्यमनया तु दिशा महेश!
अप्योषधीः प्रति नमो वयमामनामो
देहीव देहमधितिष्ठसि येन सर्वम् ॥ १७ ॥

सर्वम् त्वया जगदधिष्ठितमेव मत्वा
श्वानश्रुतौ नमसिताः पतयश्च तेषाम् ।
लोके पुनस्तव महेश्वर! भक्तियोगात्
आरोपिता अपि वयं बहुमानपात्रम् ॥ १८ ॥

द्वेधा नमो विमृशतः प्रतिभाति लोके
वेदेषु वा विषमलोचन! नान्यरूपम् ।
यत्तन्नमस्त्वयि तदीश्वरताप्रयुक्तं
त्वत्सन्निकर्षविहितं यदनीश्वरेषु ॥ १९ ॥

त्वत्सन्निकर्षकृत एव नमः प्रयोगः
प्रायो वसीयसि यवीयसि दृश्यमानः ।
श्रैष्ठ्यप्रयुक्त इति कल्पयितुं न शक्यम्
अश्रेयसामपि नमांसि निदर्शितानि ॥ २० ॥

श्रैष्ठ्यप्रयुक्तमपि नाम नमस्त्वदीयं
श्रेष्ठोऽसि यः क्रतुभुजां पतिरग्रियानाम् ।
श्रेष्ठश्श्रुतोसि भगवन्नविशेषतस्त्वं
मन्त्रेषु कृच्छ्रपठितेषु च सामगानाम् ॥ २१ ॥

देवान्तरैस्सह नमस्तुतिहूतयस्ते
तोषाय नालमलमेव विपर्ययाय ।
पुत्रार्थिनश्चरुविधौ सह चन्द्रमौळे!
सोमेन हूतमनुशुश्रम रुद्रमग्निम् ॥ २२ ॥

अग्निं प्रकृत्य खलु रुद्रपदं प्रयुङ्क्ते
तद्ब्राह्मणं भवति यत्र तयोस्सहूतिः ।
आह्वानमत्र भवतः पृथगेव दृष्टं
यत्प्रातरग्निमिति सूक्तविदः पठन्ति ॥ २३ ॥

अग्न्यादिभिस्तव महेश्वर! हूतिशङ्का
माभूदिति प्रकृतमप्यनुषङ्गोऽयम् ।
मन्त्रः क्रियापदमपास्य पदान्तरेण
त्वमाह्वयन्नुतपदेन भिनत्ति रीतिम् ॥ २४ ॥

न्यासीकृतं वसु बलादमरैरवाप्तुं
अन्वागतो रुदितवानिति रुद्रमग्निम् ।
रुद्रांस्त्वदुद्भवतया मरुतो गणान्वा
रुद्रावणेन च भवन्तमवैमि रुद्रम् ॥ २५ ॥

यज्ञेऽपि रुद्रपदमारुणकेतुकोक्तं
तच्छब्दमीश्वर! तदीयमपि स्मरन्ति ।
यत्तत्प्रदेशगतरुद्रपदावकाशे
यज्ञस्य शब्दमनुशुश्रुम सामगेभ्यः ॥ २६ ॥

सन्ताप्य रोदयितरि प्रसभं जनानां
आहुर्वरेऽपि विषमेक्षण! रुद्रशब्दम् ।
रौद्रश्च तत्प्रकृतिकं प्रतिरूपकं वा
शब्दान्तरं भवति वायसशब्दकल्पम् ॥ २७ ॥

सन्त्येव तद्धितपदप्रतिरूपकाणि
भूरीणि भागवतसात्वतसन्निभानि ।
स्यात्तादृगेव भगवानिति शब्दरूपं
षाड्गुण्यहेतुकमपि त्वदुपैति नान्यम् ॥ २८ ॥

ऐश्वर्यमग्रयमनुपाधिमती च लक्ष्मीः
ज्ञानं च वीर्ययशसी च विरागता च ।
एते गुणाः षडपि ते भगसंज्ञयोक्ताः
सन्तीत्यनेन भगवन्! भगवानसि त्वम् ॥ २९ ॥

ऐश्वर्यमीश्वरपदश्रुतिरुग्रशब्दो
वीर्यम् यशश्शिवपदं च तवाभिधत्ते ।
सर्वज्ञकामरिपुशब्दसमर्थितौ च
सार्वज्ञरागविरहौ भवतः पुरारे ! ॥ ३० ॥

अर्थश्श्रिया शिव ! न कोऽपि विरज्यस्ते
श्रेष्ठस्तया त्वमसि दाशतयीभिरुक्तः ।
लब्धुं श्रियं जनिम चारुविचित्ररूपं
अभ्यर्चितं तव मरुद्भिरुदाहरन्ति ॥ ३१ ॥

सत्यं क्षमा धृतिरधिष्ठितिरात्मबोधः
सृष्टिर्विरागतपसी मतिरीश्वरत्वम् ।
नत्वद्वियन्ति न कदाचिदपैति धर्मः
किन्तन्नयद्भवति ते गुणसंमतेषु ॥ ३२ ॥

नैवेश्वरान्नयशसा महतो न वीरान्
न श्रीमतः क्षितिपतीनपि सार्वभौमान् ।
अन्यादृशानपि महेश्वर ! वीतरागान्
प्रज्ञावतो भगवतः प्रवदन्ति वृद्धाः ॥ ३३ ॥

आथर्वणा मदनशासन ! निश्रुवाणाः
नामानि नाम भगवानिति ते निराहुः ।
अत्याश्रमोपनिषदाह भगेश्वरं त्वां
नैघण्टुकाश्च भगवन्तमुशन्ति पूज्यम् ॥ ३४ ॥

पूजा तमुष्टुहिवता विहिता महेश
मन्त्रेण वाङ्मनसकायनिबन्धना ते ।
सर्वाभिरप्युपनिषद्भिरुपासनोक्ता
नारायणोपनिषदं परिभावयामः ॥ ३५ ॥

वाक्यं यदाह दहरान्तरुपासनन्ते
यद्वा समर्पयति रूपविशेषमस्मै ।
अन्तर्गतैरपि तदौपयिकाभिधेयैः
भाव्यं वचोभिरिति वाक्यविदां प्रवादः ॥ ३६ ॥

नारायणस्य यदुपास्यतयाऽभिधानम्
यद्वा फलन्तदिह नोपलभे कथञ्चित् ।
उत्पत्तिशिष्टभवदन्वयमन्यगामि
शक्यं महेश्वर! न कर्तुमुपासनन्ते ॥ ३७ ॥

नासावुपासनमुपास्यकथैव दूरे
तस्मादुपासकतया परिशेषसिद्धिः ।
अन्तर्व्यवस्थितगिरा परमात्मनस्ते
शब्दादृतेऽपि विहितं तदुपासकत्वम् ॥ ३८ ॥

यस्य स्थितोसि हृदये परमस्त्वमात्मा
युक्तन्न तस्य परमात्मतयाऽभिधानम् ।
स्वेन स्वयं मनसि वह्निशिखान्तराळे
तिष्ठन्नुपास्य इति हास्यपदं न कस्य ॥ ३९ ॥

नारायणस्य हृदयं सुषिरं महाग्निः
अग्रेश्शिखा च परमात्मपदं यदुक्तम् ।
सर्वोप्युपासनविधेरयमर्थवादः
श्रद्धाविशिष्टपुरुषाचरणाद्विधेये ॥ ४० ॥

नारायणप्रकरणे हृदयं यदुक्तं
तस्यैव तद्भवितुमर्हति नापरेषाम् ।
दृष्टं यतिप्रकरणे यतिभिर्गृहीतं
पूर्वानुवाकविहितं यदुपासनन्ते ॥ ४१ ॥

ब्रह्मोच्यते परमसौ परभं च तत्वं
ज्योतिः परं च परमेश्वर! पद्मनाभः ।
त्वद्भावनैकरसिकस्त्वदनन्यभावात्
मन्त्री यथा गरुडभावनया गरुत्मान् ॥ ४२ ॥

गीतासु योगजविभूतिविभावनाय
नारायणश्शिवपदं प्रतिवाचमूचे ।
योगन्निशायय महेश्वरगोचरं मे
दिव्यं ददामि तव चक्षुरिति प्रसन्नः ॥ ४३ ॥

त्वामन्तरेण न कथंचिदुपासनीयं
अन्यं ब्रवीति सशिवस्तुतिरन्तकारे!
यद्ब्रह्मशब्दसमभिव्यवहारयोगात्
संहारकारिणिहरे शिवशब्दमाहुः ॥ ४४ ॥

विश्वाधिकस्त्वमसि विश्वमयं मुरारिः
यज्ञेश्वरस्त्वमसि यज्ञममुं गृणन्ति ।
आद्या जगत्प्रकृतिरेषभवान्निमित्तम्
आतः कथन्नु भगवन्युवयोरभेदः ॥ ४५ ॥

विश्वात्मनस्तुतिषु विश्वपतित्ववादः
सङ्गच्छते स्तुतितयैव रथाङ्गपाणेः ।
विश्वस्यपत्युरथ विश्वतयाभिधानं
नालं गुणाय गुणगृह्यनिकर्षहेतुः ॥ ४६ ॥

विश्वं महेश्वर! भवानधितिष्ठतीति
विश्वात्मतामुपचरन्ति यदागमास्ते ।
तत्पण्डिता विदितवेदरहस्यशीलाः
जानन्ति मन्दमतयस्तु तदेव सत्यम् ॥ ४७ ॥

तुभ्यं नमो विदधदीश्वर! तन्तमर्थम्
आतिष्ठते सकलकर्मसु विश्वदर्शी।
सर्वानुवादमिदमुक्तसमर्थनाय
कात्यायनो मुनिरुदाहरति स्म गृह्ये ॥ ४८ ॥

स्थानं यदान्तरमुपास्तिरुपासको वा
या सा परा परतया विविधा विभूतिः।
यद्वा पुनर्विषमनेत्रमुपासितव्यं
नारायणोपनिषदाह तदत्र सर्वम् ॥ ४९ ॥

यज्ञात्मना स्वयमसावृषिणोपदिष्टा
नारायणेन भवतः प्रतिपादयित्री।
सूक्तं यथा पुरुषदैवतमन्तकारे
नारायणार्षमिति तद्व्यपदिष्टमाहुः ॥ ५० ॥

एषा महोपनिषदाह हिरण्यगर्भम्
जातं त्वदेव भगवन् प्रथमं सुराणाम्।
नारायणाभिजनमेनमथापि मन्दाः
शंसन्ति तत्र भवतः कतिचित्प्रसूतिम् ॥ ५१ ॥

मध्ये ललाटमरविन्दभुवः क्षणेन
दृष्टो भवानिति क एष निकर्षवादः।
योगादिरूढमनसश्शिव! मादृशोऽपि
स्थानेषु पञ्चसु न कस्य तवोपलंभः ॥ ५२ ॥

ब्रह्माणि पञ्चतनवश्शिव मन्त्ररूपा-
जीवातवः पशुपते! शिवसंहितानाम्।
रुद्रेषु पुण्यमिव पञ्चकमक्षराणां
अस्यां महोपनिषदीति महत्त्ववादः ॥ ५३ ॥

विद्येश्वरस्त्वमसि भूतपतिस्त्वमेकः
स्रष्टुर्भवानधिपतिस्सृजति प्रपञ्चम् ।
यद् ब्राह्मणान्प्रति तव श्रुतमाधिपत्यं
तद्ब्रह्मणो मम सदाशिव जन्मलाभः ॥ ५४ ॥

विद्येश्वरत्वपुनरुक्ततया न वाच्यं
वेदाधिपत्यमयमेव महेश! वेदः ।
विद्या भवन्ति शतशः प्रविभज्यमानाः
स्रोतांसि किन्न सरितेव पृथक् कृतानि ॥ ५५ ॥

आदित्यमृग्यजुपसामनिधानकोशे
विश्वे निविष्टमधितिष्ठति पूरुषो यः ।
एषा तमेष इति साभिनया भवन्तं
भूताधिपत्यवचनेन शशंस नाम्ना ॥ ५६ ॥

उक्तो हिरण्यपतिरेष हिरण्यबाहु
रुक्तोऽम्बिकापतिरुमापतिरेष उक्तः ।
आहुर्भवन्तमधिदैवतमुष्णरश्मेः
आतस्तदर्चनविधौ भगवन्नभिज्ञाः ॥ ५७ ॥

यो मण्डलं तपति यश्च तदन्तरात्मा
या चानयोर्भवति भूतपते! विभूतिः ।
जानान एतदपि यत्फलमश्नुते च
सर्वं यथावदिह तत्कथितं क्रमेण ॥ ५८ ॥

मा नाम भूदखिलमन्यदिमं प्रदेशम्
अध्यापितास्तदिति मन्त्रविदो भवन्ति ।
वाच्यः किमस्य सविता सवितुर्वरेण्यः
किं वा भवानिति वितर्कपदं न तेषाम् ॥ ५९ ॥

भास्वन्तमेष विषयीकुरुते न मन्त्रः
शक्नोति वक्तुमधिदैवतमीश्वरं त्वाम् ।
यस्मादयं त्वयि निरोहति भर्गशब्दः
प्रज्ञाप्रचोदकतया तदधीयसे त्वम् ॥ ६० ॥

सान्तोऽयमन्तकरिपो! यदि भर्गशब्दो
यत्तत्पदद्वयमनन्वयि लिङ्गभेदात् ।
अन्वेषयेदुभयमन्यदभिन्नलिङ्गम्
अश्रूयमाणमसमञ्जस एष पक्षः ॥ ६१ ॥

शब्दस्मृतिर्ह्यसुनि वा घञि वा पदान्ते
युक्तं वदत्युभयथा स्वरमाद्युदात्तम् ।
व्यत्यस्तकारकमवैमि पदं घञन्तं
मैत्रायणश्रुतिपराहतसान्तभावम् ॥ ६२ ॥

मैत्रायणश्रुतिरसौ तदिति प्रकृत्य
भर्गं भवन्तमभिधाय विचिन्तनीयम् ।
रुद्रस्य भर्गपदगोचरतां ब्रुवाणा
सान्तं प्रतिक्षिपति भर्गपदं पुरारे! ॥ ६३ ॥

सान्तं पदं तदपि नैव ददाति वक्तुं
यद्ब्राह्मणं तलवकारिण आमनन्ति ।
प्रश्नोत्तरक्रमनिरूपितपूर्वपादं
पादं द्वितीयमपि भर्गमयं ब्रवीति ॥ ६४ ॥

भर्गः प्रचोदयति यो धियमस्मदीयां
तं धीमहीति घटना विनिमाय लिङ्गम् ।
वाच्यस्य भर्ग! भवतस्स्वपदाभिधानं
भर्गाख्यमित्यपि च साम्बवचोनुरोधः ॥ ६५ ॥

त्वामेव मन्त्रोपनिषद्ब्रवीति
तदित्यृचोऽस्याः प्रतिपाद्यमर्थम् ।
तदक्षरं तत्सवितुर्वरेण्यं
प्रज्ञा च तस्मात्प्रसृता पुराणी ।। ६६ ।।

भार्गोऽपि सन्सवितृशब्दसमन्वयेन
सावित्रतामपि विगाहत एव मन्त्रः ।
तत्तत्पदान्वयवशेन महेश ! मन्त्रान्
तद्देवतानपि हि मन्त्रविदः पठन्ति ।। ।। ६७ ।।

अप्यर्कदैवतवतीमृचमामनामः
शब्देनविश्व इति शंकर ! वैश्वदेवीम् ।
पिच्याश्च मर्त इति पुष्यपदेन पौष्णीम्
एतादृशानि कति नाम निदर्शनानि ।। ६८ ।।

एषा गतिश्श्रुतिगिरामिति निर्णयेन
तत्तद्ग्रहार्चनविधौ मुनयस्स्मरन्ति ।
मन्त्रेण शंकर ! शनेश्शमुपक्रमेण
बुध्यस्वशब्दसहितेन बुधस्य पूजाम् ।। ६९ ।।

आम्नायमृग्यजुपसामविधं विचिन्त्य
सारं समुद्धृतवता परमेष्ठिनापि ।
मन्त्रस्त्रिपादयमदृष्टविधान्तरेण
दृष्टश्चराचरगुरो ! मनुना यथोक्तम् ।। ७० ।।

गृह्णातु काममनलस्सकलं हविस्ते
राज्ञो बलिं हरतु भागदुघः प्रजाभ्यः ।
पार्थेन शंकर ! निवेदितमंबुजाक्षे
नैशं हविस्फुटमदृश्यत पादयोस्ते ।। ७१ ।।

सोमं त्वदर्थमनुशुश्रुम सूयमानं
आलंभनं पशुपते! नियतं पशूनाम्।
गव्यं च ते गवि सदेव तदध्वरेषु
चण्डेश्वरेण सह नाकसदां विवादः॥ ७२॥

उत्पत्तितश्शिव! गृहीतसमन्वयास्ते
सोमः पशुर्गवि च सन्ति हवींषितानि।
देवाः पशौ हविषि भागमनुज्ञया ते
गृह्णन्ति तद्वदितरेष्वपि कल्पनीयम्॥ ७३॥

कर्मैकमेव न परं पशुबन्धनं ते
कर्तव्यमाहुरुपलभ्य तवाभ्यनुज्ञाम्।
सर्वेषु कर्मसु भवत्प्रसवेन पुंसां
आरंभणं प्रपदमन्त्रविदो गृणन्ति॥ ७४॥

सङ्कल्पतः प्रभृति यज्ञतनुं विभज्य
देवान्प्रजापतिमुखान्प्रति दर्शयन्तः।
सोमाहुतिं हुतवहार्चिषि हूयमानाम्
अध्वर्यवस्तव गृणन्ति गिरीश! भागम्॥ ७५॥

सर्वं धन धनपतेरुपभुक्तशिष्टं
यद्देवतातिथिसमाश्रितभृत्यवर्गैः।
यज्ञेश! यज्ञपरिशिष्टमपि त्वदीयम्
अन्थिग्रहव्यतिकरे भवता यथोक्तम्॥ ७६॥

गव्येन सोमहविषा चरुभिश्च पक्वैः
साध्यान्त्रिसप्त मुनयो विभजन्ति यज्ञान्।
सर्वेषु तेष्वपि भवानविशेषतस्त्वां
राजानमध्वरविधौ वयमामनामः॥ ७७॥

अग्निं प्रकाशयतु शंकर! रुद्रवन्तं
मन्त्रस्त्वमग्न इति वा तदनन्तरो वा।
राजन्वती क्षितिरितीव विशेषणस्य
नालं प्रतीपमपनेतुमिमौ प्रकर्षम् ॥ ७८ ॥

या रोहिणी भवति देव! तदा त्वदीया
तस्यां त्वदेकविषयौ विषमाक्ष! दृष्टौ।
मन्त्राविमौ तदिह यज्ञपतिस्त्वमीश
स्पष्टं त्वदेकविषयं प्रतियान्ति धीराः ॥ ७९ ॥

पित्रा कुमारमिव भृत्यमिवेश्वरेण
शिष्यं गिरीश! गुरुणेव गुणाधिकेन।
अग्निं त्वया कृतविशेषणमूचिवांसौ
मन्त्राविमौ गमयतः परमं प्रकर्षम् ॥ ८० ॥

ऋक्संहिता वदति मेधपतिम् भवन्तं
राजानमध्वरविधेरयमाह मन्त्रः।
त्वत्सूक्तमन्त्रगणमण्डनमौळिरत्नम्
रूपेण च त्वदभिधानगृहीतशक्तिः ॥ ८१ ॥

त्वत्कं पुरा मरणतस्तनयित्नुकल्पा-
दाकारणं परमकारुणिक! ब्रुवाणः।
मन्त्रोऽयमाव इति यावदुपक्रमायाः
मूलं महेश! विदितं शिवधर्मसूक्तेः ॥ ८२ ॥

भीमोऽसि शंकर! मृगो नु निदर्शनं ते
तेजोभिरुच्चलितसूर्यसहस्रकल्पैः।
अक्रोधनस्मितमुखोऽपि निजानुभावात्
आपाततस्तनुभृतां नृपतिर्भयाय ॥ ८३ ॥

अभ्युद्यतं गिरिश! वज्रमधीमहे त्वां
त्वद्भिभ्यतः पवनभानुकृशानुशक्राः ।
मृत्युश्च तत्तदधिकारभृतस्तथान्ये
ब्रह्मत्वलक्षणमयं भयहेतुभावः ॥ ८४ ॥

घोरा शिवा च भगवन्नुभयी तनुस्ते
घोरा भिषज्यति भवार्तमुपास्यमाना ।
अन्या भिषग्जनकृतां रुजमीक्षमाणा
दृष्ट्या ददाति शिवतामशिवात्मनोऽपि ॥ ८५ ॥

घोरान्नमो विदधतश्शमयन्ति रुद्रैः
आर्ता हि घोरमुपयान्ति चिकित्सितारम् ।
प्रीणन्ति शंकर! शिवां चमकानुवाकैः
होमस्य यत्तव भवन्त्युभयेऽपि मन्त्राः ॥ ८६ ॥

विष्णुप्रजापतिपुरंदरपूर्वकेषु
वाजादितुल्यमितरेष्वपि दैवतेषु ।
आशंसितेषु चमकाः परिशिष्यमाणं
दातारमीश्वर! भवन्तमशब्दमाहुः ॥ ८७ ॥

युक्तं नमानयितुमीश्वर! सन्निधौ ते
देवान्तराणि महतामिव मर्त्यमात्रम् ।
अन्तर्द्धिमध्वरविधौ तदपेक्षमाणाः
त्वत्कर्मसीम्नि परिषेचनमाचरन्ति ॥ ८८ ॥

आत्मान्तराणि पशवः परतन्त्रभावात्
स्वातन्त्र्यतः पशुपते! पतिरीश्वर! त्वम् ।
आत्मानमौपनिषदाः प्रवदन्त्यनीशं
ईशं भवन्तमुभयोरुभयं स्वभावः ॥ ८९ ॥

संप्राप्त एव सति शंकर! पाशुपत्ये
कस्मै वरेण्य! वरणं कृपणोचितं ते।
विध्यर्थमध्ययनचोदनयागृहीता
जल्पन्ति यत्किमपि वन्दिवदर्थवादाः ॥ ९० ॥

नानापदानवचनादपि वारणीयः
त्वत्पाशुपत्यवरणप्रतिलंभवादः।
लब्धुं वरीतुमथवा कथमेक एव
वारान्बहूनपि महेश्वर! शक्यतेऽर्थः ॥ ९१ ॥

अङ्गैस्स्थिरेभिरिति रूपमनश्वरं ते
भूरीणि तानि च भुजङ्गममालभारिन्!।
मन्त्रेण चान्तरिति युष्मदुपासकाना-
मार्ग्वैदिका यदशनं तदमोघमाहुः ॥ ९२ ॥

भावोपपन्नमनसां त्वदुपासकानां
पुंसाममोघमशनं भगवन्ब्रुवाणः।
मन्त्रोऽयमन्तरिति नः प्रतिभातिमूलं
प्राग्भुक्तमर्चनविधेरनुवासरं ते ॥ ९३ ॥

नाथ! त्वया पितृमतो मरुतस्तुवानाः
त्वामामनन्ति भरतं नटनाभियोगात्।
वैशेषिके सति खलु व्यपदेशहेतौ
साधारणेन भरणेन न कश्चिदर्थः ॥ ९४ ॥

हिंसाप्रतीतिरभिमानपदैकदेशात्
शब्दादभेरिति भयेन सुमुद्रूपन्ति।
कामान्तकत्रिपुरदक्षमखादिभंग
विख्यातविक्रमतया कथितोऽसि वीरः ॥ ९५ ॥

हिंसाभिधातृपदसन्निधिना ज्वरार्थम्
रुद्रेति नाम परिशंक्य परावपन्तः ।
मन्त्रे यथान इति मङ्गळवाचि दृष्टम्
देवेश! रुद्रियपदं पुनरावपन्ति ॥ ९६ ॥

शाखासु शङ्कर! सहस्रतयीषु साम्नां
आम्नायते तव न केवलमानुभावः ।
सर्वात्मनामधिपतेरविशेषतस्ते
देवव्रतादिषु गणाः कथितानुभावाः ॥ ९७ ॥

स्कंदं विनायकमुभावपि ते कुमारौ
सर्वैर्गुणैः पितरमेव निदर्शयन्तौ ।
सामोपगायमुपगायमृचां गणेषु
संप्रीणयन्ति शिव! सामविधौ यथोक्तम् ॥ ९८ ॥

ब्रह्मादिकं सकलमन्यदपोह्य पुंसां
ध्यातव्यमेकमभिधाय शिवंकरं त्वाम् ।
वक्तव्यमन्यदनपेक्ष्य विमोक्षहेतुं
आथर्वणः परिसमाप्तिमुवाच वेदः ॥ ९९ ॥

यामामनन्ति तव शंकर! धर्मदारान्
अध्वर्यवस्सहजतिद्रुतया स्वसारम् ।
आथर्वणा यदुपसृष्टतया भवन्तं
ध्यातव्यमाहुरपहाय पितामहादीन् ॥ १०० ॥

एकश्श्रुतोऽसि परमेश्वर! सद्वितीयं
मन्त्रा यया व्यपदिशन्ति पुनः पुनस्त्वाम् ।
तस्याः प्रभावमतिवाङ्मनसं शिवायाः
कार्त्स्न्येण वक्तुमनलं कमलासनोऽपि ॥ १०१ ॥

एकं मुखं त्रितयमीश्वर! लोचनानां (लोचनं च)
चत्वारि दोंषि विशदं वपुरद्भुतं ते।
नित्यं तदेव भजतामुपकारहेतोः
नाना भवन्ति तनवस्तव दिव्यरूपाः ॥ १०२ ॥

कैरातमीश्वर! पिनाकधरं वपुस्ते
कृत्तिम् वसानमुमया सह धर्मदारैः।
आराधयन्ति खलु पर्वणि साकमेधे
पुण्यैस्त्रियंबक! हविर्भिरनन्यभावाः ॥ १०३ ॥

मीढ्वांसमन्तविनिवेशितमीढुपीकं
अन्तर्जयन्तमजरामरविग्रहं त्वाम्।
त्वद्वारपं दयितया सह देवसेनं
क्षेत्रस्य नाथमपि नाथ! यजन्ति धन्याः ॥ १०४ ॥

पत्न्या समं सह गणैस्सह वा सुताभ्यां
सार्धं तथा परिषदा विषमेक्षण! त्वाम्।
अध्यष्टमीतिथिनिशामुखमर्चयन्तः
पापं तरन्त्यपि जयन्ति महेश! मृत्युम् ॥ १०५ ॥

मन्त्रा भवन्ति विरळा विबुधान्तराणां
सद्भाव एव शिव! दर्शितशक्तयस्ते।
त्वन्नामरूपगुणवर्णनलब्धवर्णा-
मन्त्रा न शक्यमवगंतुमियत्तया ते ॥ १०६ ॥

रुद्रानुवाकपठितानि परस्सहस्रं
नामानि दिव्यमपि रूपमनेकशस्ते।
शक्यं गुणा गणयितुं गणना यदि स्यात्
भौमेषु पांसुषु विना तव देव! मायाम् ॥ १०७ ॥

वेदस्स्वयं भवतु वा तव वा प्रणीतिः
सर्वः प्रमाणमविहाय गृणाति लोकः ।
तत्तत्प्रवक्तृगुणदर्शिततारतम्यं
अन्यत्प्रमाणमविरोधिनि वेदवाक्ये ॥ १०८ ॥

वेदाः प्रमाणमिति संगिरमाण एव
दिव्यं तवागममवैति जनः प्रमाणम् ।
त्वद्ध्यानवाक्यविषयौपयिकैः पदार्थैः
आमूर्द्धमाकलितविग्रहमाच मूलात् ॥ १०९ ॥

ध्यानं यथा भवति तद्विषयो यथा त्वं
यादृग्गुणश्च भगवन्नधिकारिवर्गः ।
सर्वाणि तानि भवदागमसंहिताभिः
कल्पैरिवाध्वरविधेरुपपादितानि ॥ ११० ॥

अध्वानमध्वपतिमध्वनि तारतम्यं
श्रेष्ठाध्वपारगमनं च फलं ब्रवीति ।
मन्त्रोऽध्वनामिति महेश्वर! गृह्यकारः
पिता कुमारमुपनीय वदन्हि वाक्यं ॥ १११ ॥

कल्पाः प्रमाणमृषिभिर्यदि नः प्रणीताः
किन्न प्रमाणमृषिणा महता वहर्षे ! ।
शक्यं न वक्तुवपरिग्रहदूषितानि
तन्त्रान्तराणि भवता शिव! कर्तृमन्ति ॥ ११२ ॥

आचक्षते यमृषिमार्षविदस्तपोभिः
एकैकमन्त्रदृशमीश्वर ! वेदराशेः ।
द्रष्टारमस्य निखिलेन निजानुभावात्
अन्यानृषीनति महर्षिमतो विदुस्त्वाम् ॥ ११३ ॥

उक्तं प्रधानपुरुषेश्वरमेव सांख्यैः
आख्याय पाशपशुपत्यभिधानभेदात् ।
ज्ञेयं त्वदागमविदश्शिव ! सङ्गिरन्तां
एतावता किमिति नस्तदुपेक्षणीयम् ॥ ११४ ॥

प्रत्यक्षवेदविहितं प्रथितं पुराणैः
बोधायनेन मुनिना बहुशः प्रणीतम् ।
सर्वार्त्थदर्शनपरैरपि गृह्यकारैः
यज्ञोपवीतमिव विस्मृतमर्चनन्ते ॥ ११५ ॥

वेदोपबृंहक पुराणवचःप्रपञ्चैः
आघोष्यते विषमनेत्र! समर्चनन्ते ।
तन्त्रैरलं तदुपबृंहकवेदमूलैः
वात्याहतं न हि मुखानिलसव्यपेक्षम् ॥ ११६ ॥

वेदार्त्थनिर्णयविधौ हि पुराणमङ्गं
निर्णीतवेदविषया स्मृतयो भवन्ति ।
आतश्श्रुतेरिव पुराणगिरस्सकाशे
नालं प्रकाशयितुमात्मबलावलेपम् ॥ ११७ ॥

मूलश्रुतेरनुपलंभपराहतायाः
दूतीव या न भवति स्वरसात्प्रमाणम् ।
प्रत्यक्षवेदविहितं यजनं त्वदीयं
तस्या स्मृतेरपि किमिच्छति दृष्टिपातम् ॥ ११८ ॥

पौर्वाह्णिकानुपदिशन्नियमान्यदेतत्
अभ्यर्चनं मनुरवोचत देवतायाः ।
तत्किं पुनस्तव महत्यसि देवता त्वं
मृग्ये च काचशकले न मणेरुपेक्षा ॥ ११९ ॥

पत्न्या समं सह वृषेण वृषेन्द्रकेतो
युष्मद्बलीनुपदिशन् त्रिदशावकाशे ।
अभ्यर्चनं भवनकल्पनपूर्वकं ते
बोधायनः कथितवानवयुत्य गृह्ये ॥ १२० ॥

भावान्तराणि परिहाय महत्सु नित्यं
विज्ञानयोगविभवेषु महीयसे यत् ।
देवो महानभिहितोऽसि ततः कपर्दिन्!
नाम त्वदीयमिदमाङ्गिरसा निराहुः ॥ १२१ ॥

द्वेधा तवार्चनविधिस्तरुणेन्दुमौळे!
कामाय कश्चिदपरो दुरितक्षयाय ।
अप्यग्निहोत्रमुभयं वयमामनामः
स्वर्गाय यद्भवति यद्दुरितं क्षिणोति ॥ १२२ ॥

यद्ब्राह्मणस्त्वमसि नाकवतां निकाये
तुभ्यं निवेदितमभोज्यमिति स्मरन्ति ।
उच्छिष्टमीश्वर! विशिष्टमपि द्विजानां
भूमौ निखेयमथवांभसि मज्जनीयम् ॥ १२३ ॥

त्वं ब्राह्मणस्त्वदुपधावनमेव कार्यम्
तद्ब्राह्मणैस्त्वदितरे न भवन्त्युपास्याः ।
न ब्राह्मणानवरवर्णनिषेवणेन
संभावयेम यदि नः प्रपदं प्रमाणम् ॥ १२४ ॥

उत्कर्षतः परिहरन्त्यपकर्षतो वा
का वासना भवति कस्य कृते न विद्मः ।
यद्दीक्षितस्य पतितस्य च तुल्यरूपं
प्रत्यादिशन्ति मुनयः कमनीयमन्नम् ॥ १२५ ॥

चण्डालचण्डिलचितानलशौण्डिकानां
गोब्राह्मणज्वलनदीक्षितयोषितां च ।
स्पर्शः कया भवति वासनया निषिद्धः
स्पृष्टेषु वा शिव! कया विहिता विशुद्धिः ॥ १२६ ॥

वर्ज्यान्नमाहुरपि दीक्षितसन्निकल्पं
भोज्यान्नमेवकृतराजपरिक्रयं तम् ।
शंखास्थि पावनमपावनमस्थि नृणां
इत्थं स्थिते वचनमत्र परायणन्नः ॥ १२७ ॥

अब्राह्मणैः क्षुदपघातकमस्तु भोज्यं
यद्देवतान्तरनिवेदितमुक्तमन्नम् ।
तद्ब्राह्मणैरपि किमीश्वर! वैश्वदेवे
हार्यो बलिर्वलिमतामशितेन तेन ॥ १२८ ॥

देवान्तरैरशितमुक्तमनङ्गशासिन्
अश्नन्ति चेदनशितेन बलिम् हरन्तः ।
आज्यैकदेशविहितो बलिरन्यथासन्
नालं फलाय विपरीतफलाय तेषाम् ॥ १२९ ॥

ब्राह्मणमीश्वर! पुरा हतवानसीति
भिक्षाटनं विमृशतः प्रतिभानमात्रम् ।
यत्पञ्चमे शिरसि पुष्पसमं निकृत्ते
जीवन्तमेनममितायुषमाहुराप्ताः ॥ १३० ॥

आनाभिजानु वसितं वसनं न शाणं
पाणौ कपालशकलं न विलोकितं ते ।
नालंवते शवशिरस्तव केतुयष्टौ
भैक्षं न सासभवनं सकलं तदास्ताम् ॥ १३१ ॥

यत्कालभैरवकृतं पतनीयमेनः
किं तेन ते भवति भैक्षमथापि वृत्तिः ।
तन्मध्यपातिनि वधे विबुधान्तरस्य
निर्वेदमाचरसि किन्नु भवानजस्रम् ॥ १३२ ॥

यत्पाशुपत्यमवृणोदमरांतरेभ्यो
भिक्षां भवानकृतयत्परमेश्वरोऽपि ।
चोद्यं तदेतदुभयं परिहर्तुकामो
मन्ये बृहस्पतिरपि प्रतिपत्तिशून्यः ॥ १३३ ॥

ब्रह्मासि विष्णुरसि सर्वमसीति यत्त्वाम्
आस्तामुपासनविधिम् कथयन्ति मूढाः ।
तद्देवतान्तरनिकर्षनिगूहनाय
मोहाय वा भवतु जल्पितमल्पबुद्धेः ॥ १३४ ॥

अद्वैतमागमशिरोभिरुपासनायां
उक्तं तवेति परमार्थतथा न वाच्यम् ।
भेदस्फुटो गरुडमान्त्रिकयोरलीकं
तादात्म्यभावनमथापि विषं प्रमार्ष्टि ॥ १३५ ॥

यद्ब्रह्मपंचमशिरोलवनापदानं
यद्ब्रह्मणा च हरिणा च विमार्गणं ते ।
यद्वा तयोर्जनयितारमधीमहे त्वां
तत्सर्वमीश्वर ! विमूढधियामसह्यम् ॥ १३६ ॥

सोमे लतात्मनि महेश्वर ! गौणवृत्त्या
विष्णोरवादि जनकत्वमृचा कयापि ।
त्वय्येव तद्भवितुमर्हति मुख्यवृत्त्या
नेन्द्रे न पङ्कजभवे नितरां मुरारौ ॥ १३७ ॥

अन्योन्यतो यदि भवेदहमीश्वरस्स्यां
त्वं चाहमीश्वर! किमत्र नियामकं नः।
को वा विपर्यसितुमर्हति वस्तुशक्तिम्
तत्तत्स्वभावनियतां भवदाज्ञयापि ॥ १३८ ॥

एकं तवाप्यसुकरं तदुदाहरामो
जातेन भाव्यममरान्तरवत्त्वयापि।
अभ्यर्थितोऽपि हि महेश! महर्षिदारैः
अन्तर्हितस्त्वमसि गर्हितगर्भवासः ॥ १३९ ॥

इच्छावतीर्णमुरशासनगर्भवासः
स्याच्चेदुदाहरणमेष विमर्शनीयः।
गर्भे वसामि परिवेष्ट्य जरायुणाऽहम्
मासान्बहूनिति महेश्वर! कस्य कामः ॥ १४० ॥

इच्छापि नूनमनुयाति पुरा कृतानि
कर्माणि शंकर! शुभाशुभलक्षणानि।
इच्छावतारवचनानि तु भारतादौ
नारायणस्य गुणवादमुदाहरन्ति ॥ १४१ ॥

विधातारं कश्चिद्भजति भजते कश्चन हरिम्
सुरानन्यानन्ये जगति सफलास्सर्वविधयः।
तथापि त्वद्भक्तेश्शिव! शिव! यदा चर्मवदिति
श्रुतो मन्त्रो देवान्तरभजनदैन्यं न सहते ॥१४२॥

शशे शृङ्गं पुष्पं नभसि मृगतृष्णासु सलिलम्
प्रसूतिर्वन्ध्यायामनवधिमदायुस्तनुभृताम्।
विमुक्तिर्वा देवान्तरभजनलभ्या पशुपते!
न शक्यं नस्संभावयितुमपि सर्वम् विमृशताम् ॥

न भिन्ना नौरन्यानलमुदनिधेरुद्गमयितुं
शिला नैवोन्नेतुं प्रभवति शिलामन्तकरिपो! ।
जनित्वा मृत्वा वा जगति परिवर्ती सुरगणः
कथं मे संसारभ्रमणभयभाजस्तु शरणम् ॥ १४४ ॥

देवतान्तरपुनः पुनर्भवं पश्यतः पशुपते! भयं मम ।
क्रीडतोऽपि तव जन्म मास्मभूत् दीयतामयमपश्चिमो वरः ॥१४५॥

वासनापरिगृहीत देवता वर्णनौपयिकसर्ववाङ्मयम् ।
धिग्धिगीश्वर! जडाशयं जनम् तावकैरहमसानि सङ्गतः ॥१४६॥

पांसुकेळिरपि यस्य शैशवे शैवपाशुपतपादपांसुभिः ।
स्तोत्रकर्मणि न तस्य मे गुणः तद्गुणोऽयमुपपद्यते त्वयि॥१४७॥

स्तोत्रीयमर्थमुपपादितवानहं ते
भक्तेति भक्तजनवत्सल! भाषमाणः ।
आविर्बभूविथ शिखी शुचिनाम्बरेण
यज्ञोपवीतमुपवीय धृतत्रिपुण्ड्रः ॥ १४८ ॥

भक्तं भवानदित पार्श्वचरोपनीतं
मह्यं महेश्वर! पयश्श्रपितं प्रसन्नम् ।
भुञ्जान एव तदहं झडितिप्रबुद्धः
स्वप्नस्समाधिरिति युक्तधियामभिन्नः ॥ १४९ ॥

स्तोत्रमेतदवधाय गृह्णतां अर्थमस्य निखिलेन जानताम् ।
ग्राह्यमन्यदपि नावशिष्यते ज्ञेयमन्यदपि वा न किञ्चन॥१५०

पञ्चाशदुत्तरशता श्रुतिसूक्तिमाला
भोगावली भुजगराजमनोहरा ते ।
वेदेषु भक्तिमपरागमवैदिकेषु
तन्त्रेषु भक्तिमतुलां त्वयि च प्रसूते ॥ १५१ ॥

॥ समाप्ता श्रुतिसूक्तिमाला ॥

मिथ्या कल्पित भोगमोक्षदवचस्सन्तान सत्वापन
व्याग्राणामचिर प्रभावविबुध प्रेम्णा महेशद्विषाम् ।
मूर्ध्निष्वेक दुरात्मनां विरचिता निर्घातवाताः परैः
विद्वद्भिः परमेश्वर श्रुतिकथा तात्पर्य सङ्ग्राहकैः ॥

तत्वप्रकाशिकाख्या व्याख्या शिवलिंग भूभुजारचिता ।
प्रख्यात मेव भक्तिः पुरहरपादांबुजार्पिता सततम् ॥

अघटितघटनापटवे प्रकटित करुणाय गगन सिन्धु भूमे ।
वटतरुमूलस्थितये विघटित तमसे महेश्वराय नमः ॥

॥ सर्वं साम्बशिवार्पणमस्तु ॥